# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058

दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966

अन्तर्जालपुटम् - www.sanskrit.nic.in


**अधिसूचनायाःसंख्या - के.सं.वि./36014/विज्ञापनम्/एस्-I/2024-25/03** दिनाङ्कः – **10/06/2024**

## संस्कृतसंवर्धनयोजनायाः अन्तर्गतं वित्तीयसहायताप्रदानार्थं वित्तवर्षम् 2024-25 इत्यस्य कृते अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्

संस्कृतसंवर्धनयोजनायाः अन्तर्गतं केन्द्रीयसंस्कृतविश्वविद्यालयस्य 05.05.2024 दिनाङ्कस्य अधिसूचना, भारतस्य विविधसमाचारपत्रेषु 09.05.2024 दिनाङ्के प्रकाशितम्, तथा 10.05.2024 दिनाङ्के विश्वविद्यालयस्य अधिसूचना इत्यस्य अनुगुणम् अधोलिखिताः केन्द्रीययोजनाः उपलक्ष्य सर्वकारेतरसंस्थाभिः/ स्वैच्छिकसङ्घटनैः/ संस्थाभिः/ विश्वविद्यालयैः/ प्रकाशकैः/ वैयक्तिकरूपेण/ छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1. | **संस्कृतशिक्षणम्** - पारम्परिकसंस्कृतपाठशालासु/ महाविद्यालयेषु/ सर्वकारीयविद्यालयेषु/ चतुष्पाठिसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था तथा आवासीयच्छात्रवृत्तिश्च। | 10.06.2024 | 31.07.2024 |
| 2. | **सम्मानराशिः -** अभावग्रस्तपरिष्ठितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः। | | |
| 3. | **संस्कृतसंवर्धनाय कार्यक्रमाः गतिविधयश्च -** विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता। | | |
| 4. | **संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च** | | |
| 5. | **शास्त्रचूडामणिः** - संस्कृतशास्त्रशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः। | | |
| 6. | **व्यावसायिकप्रशिक्षणम् -** पञ्जीकृतासु पारम्परिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम्। | | |
| 7. | **छात्रवृत्तिः** - पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमीकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/ पालिं/ प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः। | 05.06.2024 | 15.09.2024 |

## अवधातव्याः निर्देशाः

आनलाईन- आवेदनार्थं नवीना एवं नवीकरण-सर्वकारेतरसंस्था/ स्वैच्छिकसङ्घटनम्/ संस्था/ विश्वविद्यालयः भारसर्वकारस्य अधोलिखिते पोर्टल-मध्ये पञ्जीकरणम् अनिवार्यरूपेण कुर्यात्।

- सर्वाः उच्चशिक्षासंस्थाः "All India Survey on Higher Education (AISHE)"इति पोर्टल-मध्ये पञ्जीकृताः भवेयुः। पञ्जीकरणार्थं लिंक विद्यते https://aishe.gov.in
- सर्वाः विद्यालयीयाः संस्थाः "Unified Digital Information on School Education (UDISHE+)" इति पोर्टल-मध्ये पञ्जीकृताः भवेयुः। पञ्जीकरणार्थं लिंक विद्यते http://udiseplus.gov.in
- सर्वाः सर्वकारेतरसंसस्थाः(एन.जी.ओ) **"Darpan Portal of NITI Aayog"** इति पोर्टल-मध्ये पञ्जीकृताः भवेयुः। पञ्जीकरणार्थं लिंक विद्यते https://ngodarpan.gov.in

**प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य अग्रेसरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटम् www.sanskrit.nic.in/schemes अवलोकयन्तु।**

अन्ये सर्वे नियमाः 09.05.2024 दिनाङ्के प्रकाशितायाः अधिसूचनायाः अनुसारं विद्यते।

हस्ता/-

निदेशकः(केन्द्रीययोजनाः)